ॐ

# श्री चिन्मयाष्टकम्

ॐकारसूनमकरन्दरसं पिबन्तं अध्यात्मभृङ्गमवनीतल भाग्यशृङ्गम्
आनन्दपूर्णमतिमप्रतिमप्रभावं श्री चिन्मयं गुरुवरं हृदि भावयामि ।1

उन्मीलदम्बुजदलायतमुग्धनेत्रं उत्तप्तनिर्मलसुवर्णसमानगात्रम्
उन्निद्रभक्तजनमानसराजहंसं श्री चिन्मयं गुरुवरं हृदि भावयामि ।2

आयामरम्यभुजदण्डगम्भीररूपं मायान्धकारविनिवारणभद्रदीपम्
मुद्रादरिद्रकरुणावरुणाधिवासं श्री चिन्मयं गुरुवरं हृदि भावयामि ।3

धावल्यमञ्जुलमृदुस्मितकान्तिपूरं विस्मारिताखिलपदानतदुःखभारम्
आताम्रशोभनपरिच्छद संवृताङ्गं श्री चिन्मयं गुरुवरं हृदि भावयामि ।4

विज्ञानसारवचनामृत जह्नुकन्या निःशेषधौतभवकिल्बिषमुन्नतांसम्
श्री खण्डमण्डितमनोज्ञविशालफालं श्री चिन्मयं गुरुवरं हृदि भावयामि ।5

सान्दीपनीतिभुवनप्रथितं प्रशान्तं अध्यासितं परममङ्गलमालयाघ्र्यम्
श्रीमत्तपोवनतपोधनुशिष्यवर्यं श्री चिन्मयं गुरुवरं हृदि भावयामि ।6

कल्याणशीतलकटाक्षनिरीक्षणेन तापत्रयप्रशमनैकपरं सुधीरम्
प्रज्ञानवारिधितरङ्गविहारलोलं श्री चिन्मयं गुरुवरं हृदि भावयामि ।7

नानापुराणनिगमागमतत्त्वविज्ञं साक्षात्कृतप्रणवसारमुदारभावम्
संसारघोरतरकाननदाववह्निं श्री चिन्मयं गुरुवरं हृदि भावयामि ।8

ॐ

## śrī cinmayāṣṭakam

omkārasūna-makaranda-rasaṁ pibantaṁ adhyātma-bhṛṅgam-avanītala bhāgyaśṛṅgam
ānandapūrṇamatim-apratimaprabhāvaṁ śrī cinmayaṁ guruvaraṁ hṛdi bhāvayāmi |1

unmīladambujadalāyata-mugdhanetraṁ uttapta-nirmala-suvarṇa-samāna-gātram
unnidrabhaktajana-mānasa-rājahaṁsaṁ śrī cinmayaṁ guruvaraṁ hṛdi bhāvayāmi ||2

āyāmaramya-bhujadaṇḍa-gambhīra-rūpaṁ māyāndhakāra-vinivāraṇa-bhadra-dīpam
mudrādaridra-karuṇā-varuṇādhi-vāsaṁ śrī cinmayaṁ guruvaraṁ hṛdi bhāvayāmi ||3

dhāvalyamañjula-mṛdusmita-kāntipūraṁ vismāritākhilapadānata-duḥkhabhāram
ātāmraśobhana-paricchada saṁvṛtāṅgaṁ śrī cinmayaṁ guruvaraṁ hṛdi bhāvayāmi |4

vijñānasāra-vacanāmṛta jahnukanyā niḥśeṣadhautabhava-kilbiṣamunnatāṁsam
śrī khaṇḍamaṇḍita-manojñaviśālaphālaṁ śrī cinmayaṁ guruvaraṁ hṛdi bhāvayāmi |5

sāndīpanītibhuvanaprathitaṁ praśāntaṁ adhyāsitaṁ parama-maṅgala-mālayāghryam
śrīmattapovana-tapodhanuśiṣyavaryaṁ śrī cinmayaṁ guruvaraṁ hṛdi bhāvayāmi ||6

kalyāṇaśītala-kaṭākṣa-nirīkṣaṇena tāpatraya-praśamanaikaparaṁ sudhīram
prajñānavāridhitaraṅgavihāralolaṁ śrī cinmayaṁ guruvaraṁ hṛdi bhāvayāmi ||7

nānāpurāṇanigamāgama-tattvavijñaṁ sākṣātkṛta-praṇava-sāram-udārabhāvam
saṁsāra-ghoratara-kānana-dāvavahniṁ śrī cinmayaṁ guruvaraṁ hṛdi bhāvayāmi ||8